**Shodhshauryam, International Scientific Refereed Research Journal**
Available online at : **www.shisrrj.com**
OPEN ACCESS
© 2025 SHISRRJ | Volume 8 | Issue 1
ISSN : 2581-6306
**doi :** https://doi.org/10.32628/SHISRRJ

# संस्कृतदूतकाव्यपरम्परायां पण्डित-श्री प्रोबधकुमारमिश्रपादाः

श्री राजकिशोरदाशः
शोधच्छात्रः, साहित्यविभागः, राष्ट्रियसंस्कृतविश्वविद्यालयः,तिरुपतिः

**Article Info**

Accepted : 02 Feb 2025
Published : 20 Feb 2025

**Publication Issue :**
January-February-2025
Volume 8, Issue 1

**Page Number :** 241-243

**सारांशः** -गीर्वाणवाणी युगे युगे भारतीयैः न केवलं समाराध्यतेअपि तु विश्ववासिभिः सर्वैरपि समाद्रियते। बहुकालादारभ्य गीर्वाणवाण्यां नैकान्यनवद्यानिकाव्यरत्नानि कविभिर्विरचितानि संस्कृतसाहित्यभाण्डागारं सुसमृद्धं विदधति। तत्र वाल्मीकि-व्यास-कालिदास-भास-भवभूति-माघ-भारवि-रत्नाकर-श्रीहर्ष-जयदेवप्रमुखा:महाकवय:स्वीयोदात्तमहनीयकवित्वशक्त्या सुमहान्ति काव्यानि निर्माय विश्वेऽस्मिन् विश्रुतकीर्त्तयः सञ्जाताः।साम्प्रतमपि सेयं विशाला कविपरम्पराक्षुण्णास्तीति नास्ति सन्देहस्य लेशः।साम्प्रतं भारतभूखण्डेऽस्मिन् उत्कलप्रदेशे विद्यमानेषु नैकेषु कविषु पण्डितश्रीप्रबोधकुमारमिश्रमहोदय उत्कलकालिदासरूपेण नितरां प्रतिभाति। तेषु पण्डितप्रबोधकुमारमिश्रः अन्यतमः। अतः तद्विषये मया लेखः विलिख्यते।
विशेषशब्दाः- कविः , भारविः, रत्नाकरः, उत्कलप्रदेशः, स्वप्नदूतम्, मलयदूतम्, इत्यादयः।

**उपोद्घातः**- गीर्वाणवाणी युगे युगे भारतीयैः न केवलं समाराध्यतेअपि तु विश्ववासिभिः सर्वैरपि समाद्रियते। बहुकालादारभ्य गीर्वाणवाण्यां नैकान्यनवद्यानिकाव्यरत्नानि कविभिर्विरचितानि संस्कृतसाहित्यभाण्डागारं सुसमृद्धं विदधति। तत्र वाल्मीकि-व्यास-कालिदास-भास-भवभूति-माघ-भारवि-रत्नाकर-श्रीहर्ष-जयदेवप्रमुखा:महाकवय:स्वीयोदात्तमहनीयकवित्वशक्त्या सुमहान्ति काव्यानि निर्माय विश्वेऽस्मिन् विश्रुतकीर्त्तयः सञ्जाताः। इमे महाकवयः नवकवीनां पथप्रदर्शकाः सर्वथा सन्ति। एतेषामादर्शेनानुप्राणितैः परवर्तिनि कालेऽपि नैकैर्महाकविभि:स्वीयामृतलेखन्या काव्यानि विरच्य देशस्यास्य परम्परा सुमहती संरक्षितेति सर्वथैमे पूज्याः। साम्प्रतमपि सेयं विशाला कविपरम्पराक्षुण्णास्तीति नास्ति सन्देहस्य लेशः।साम्प्रतं भारतभूखण्डेऽस्मिन् उत्कलप्रदेशे विद्यमानेषु नैकेषु कविषु पण्डितश्रीप्रबोधकुमारमिश्रमहोदय उत्कलकालिदासरूपेण नितरां प्रतिभाति।

**पण्डितश्रीप्रबोधकुमारमिश्रमहोदयानां परिचयः**- वासन्तिककोकिलकविकालिदास इव कान्तकोमलमञ्जुलपदावलीवलितं माधुर्य्यौजोगुणगुणितं गैडिपाञ्चाल्यादि रीतिरञ्जितमुपमानानुप्रासाद्यलंकारैरलङ्कृतं दूतकाव्यतः आरभ्य सामाजिकरीतिशाणितं नानाविधं काव्यं विरच्य कविपण्डितश्रीप्रबोधकुमारमिश्रपाद:संस्कृतसाहित्यजगति उज्वलज्योतिष्करूपेण प्रतिभाति।

पुण्यतोया-चित्रोत्पलालवणनद्योः संयोगस्थलसन्निकटे देवविद्ब्राह्मणसंकुले कटकमण्डलान्तर्गते "सरपडा" ग्रामे लब्धजन्मा पण्डितश्रीप्रबोधकुमारमिश्रमहोदय"उदियारमादेवीसोमनाथयो:" क्रोडमण्डनं कृतवान्। झङ्कडवासिन्याः मातुः सारलादेव्या अपारकरुणया मिश्रमहोदयः विविधानि काव्यानि रचयन्नस्ति।

**Copyright © 2025 The Author(s):** This is an open-access article distributed under the terms of the Creative Commons Attribution **4.0 International License (CC BY-NC 4.0)**

**संस्कृतसाहित्यं प्रति श्रीमिश्रमहोदयस्यावदानम्-** उत्कलकालिदासोपाधिविमण्डितस्य कविपण्डितस्य काव्येषु गङ्गायमुनासरस्वतीवत् त्रिधारा अव्याहतगत्या प्रवहति । कविकालिदासः एकमेव दूतकाव्यं रचितवान्, परन्तु पण्डितमिश्रमहोदयस्य सारस्वतलेखनीतः जातीयतावादसंवलितानि हृद्यानि सप्तदूतकाव्यानि झरितानि । न केवलं दूतकाव्यानां रचने सः निपुणः, अपि तु बहुनां श्लोकबद्धकाव्यकवितानां विरचने सिद्धहस्तः सः। अनेन रचितानि पुस्तकानि यथा–पुस्तकानि

**स्वप्नदूतम्-** काव्यमिदं प्रणयपूर्णम् । एका प्रणयिनी तस्याः प्रियतमं प्रति स्वप्नमाध्यमेन सन्देशं प्रेषयति । स्वप्नो यतोऽत्र दूतकर्म निर्वाहयति ततः काव्यमिदं स्वप्नदूतमिति नाम विधत्ते । अस्य काव्यस्य मुखबन्धः भारतवर्षस्य दिवंगतेन प्रज्ञापुरुषेण श्रीमता सर्वपल्ली राधाकृष्णन्– महाभागेन लिखितः । अपि च भारतवर्षस्य तदानीन्तनेन राष्ट्रपतिना श्रीमताभिः भिः गिरि–महोदयेन काव्यमिदं पुरस्कृतम् । मन्दाक्रान्ताछन्दसा सह विविधानि छन्दांसि अत्र प्रयुक्तानि ।

**मलयदूतम्-**पण्डितस्य मिश्रस्य सर्वश्रेष्ठकृतित्वेन विवेचितं काव्यमिदं देशात्मबोधमाधारीकृत्य विरचितम् । काव्येऽस्मिन् एकः स्वाधीनतासंग्रामी कारागारे अवरूद्धः सन् मलयपवनस्य सविधे तस्य हृदयानुभूतिं प्रकाश्य देशवासीनां पुरतः तस्य सन्देशमुपस्थापयितुं निवेदयति । उत्कलस्य साहित्य अकादमी पक्षतः पुरस्कृतं काव्यमिदं भवति अस्य शोधप्रबन्धस्यालोच्यविषयः ।

**रक्तझङ्कारम्-** दूतकाव्यमिदं जातीयतावादिभावधारामाधारीकृत्य विरचितम् । काव्येऽस्मिन् स्वाधीनतासंग्रामिनी एका नारी तस्याः स्वाधीनतासंग्रामस्य स्मृति स्मरन्ती एकस्य शुकस्य पुरतः तस्याः मानसिकी व्यथां प्रकाशयति । स्वाधीनोत्तरभारतवर्षस्य विवर्ण चित्रं तस्याः वक्तव्ये प्रतिफलितम् । मन्दाक्रान्ता छन्दसा विरचितं काव्यमिदं मानवसमाजं प्रति उच्चतरं नैतिकं सन्देशं समुद्रवहति ।

**प्रज्ञादूतम्**– दूतकाव्यमिदमत्युच्चं दार्शनिकं चिन्तनं विधत्ते । एकः सन्यासी स्वस्य प्रज्ञां दूतत्वेन विधाय विश्वविषये समाजविषये च तस्यानुभवं मानवान् प्रति प्रेषयति । विविधैः छन्दोभिः विरचितेऽस्मिन् काव्ये "ब्रह्म सत्यं जगन्मिथ्या" इति तत्त्वं प्रतिपादितं दृश्यते

**स्मृतिदूतम्-** काव्येऽस्मिन् एकः चिन्तानायकः आत्मनः स्मृतिं दूतत्वेन नियोजयति । प्रणयःदर्शनं चात्र समभावेन प्रकाश्येते । मानवहृदयस्य विभिन्नाः अवस्थाः अत्र वर्णिताः।काव्येऽस्मिन् विविधानि छन्दांसि प्रयुक्तानि

**मानसदूतम्-**विविधैः छन्दोभिः विरचितं दूतकाव्यमिदं भारतवर्षस्य सांप्रतिकीं सामाजिक राजनीतिक स्थितिमाधारीकृत्य भिन्नं स्वादं समुवहति । काव्येऽस्मिन् एका नारी स्वाधीनतासंग्रामिनी दिवंगतं महात्मागान्धिनं प्रति एकेन शुकमाध्यमेन सन्देशं प्रेषयति । सांप्रतिके भारतवर्षे सर्वस्मिन् क्षेत्रे यत् अवमूल्यायनं दृश्यते तद्विषयेऽत्र महान् क्षोभः प्रकाशितः।

**तमसादूतम्-** काव्येऽस्मिन् सृष्टितत्त्व विषयिणी चिन्ता प्रकटिता । एकः सन्यासी तमसां तस्य दूतत्वेन नियोज्य तथा मानवसमाजं प्रति सन्देशं प्रेषयति । तस्य सन्देशे सृष्टिरहस्यं स्थानितम् । एतानि दूतकाव्यानि विहाय पण्डितस्य मिश्रस्य संस्कृतभाषया लिखितानि बहुनि अपराणि काव्यानि अपि सन्ति । तेषां विषये अधः चालोच्यते संक्षेपतः ।

**वन्दिनःस्वदेशचिन्ता-**उत्कलस्य वरपुत्रेण दिवंगतेन उत्कलमणिना पण्डितेन गोपबन्धुदासेन उत्कलभाषया रचितस्य "वन्दिर स्वदेशचिन्ता" इत्याख्यस्य कालजयिनः काव्यस्य संस्कृतानुवादः काव्येऽस्मिन् कृतः । काव्येऽस्मिन् विविधानि छन्दांसि प्रयुक्तानि । अनुवादेऽस्मिन् उत्कलमणेः गोपबन्धोः भाषा शैली–भावादिकं च यत्नतया संरक्षितम् । विशेषभावेन गोपबन्धोः सूक्तयोऽत्र सयत्नं संरक्षिताः ।

कलाकुसुमम्–कौमुदी–मूर्च्छना–प्रियदर्शिनी इन्दिरा–शान्तिदूतसमीक्षा–वन्देभारतम्–उत्कलगौरवम्–आनन्दसन्धानम्–दक्षिणकालिस्तुतिः–सुनियादूतम्–व्याकरणतरङ्गिणी–नीतिवल्लरीइतोऽपि अनेके ग्रन्थाः तेषां समुपलभ्यन्ते।

उपसंहारः–संस्कृतसाहित्यजगति श्रीमिश्रमहोदयस्य दूतकाव्यानि प्रमुखं स्थानमावहन्ति ।उत्कलकालिदासः इति उक्ते सति उत्कलस्यावदानं संस्कृतं प्रति ज्ञायते एव।अतः कपिलसंहितायामुक्तं यत्–

**पृथिव्यां भारतं श्रेष्टं भारते चोत्कलः स्मृतः।**

**उत्कलस्य समो देशः क्वापि नास्ति महितले ।।**

**सहायकग्रन्थाः**


1. अग्निपुराणम् – व्यासमहर्षि, गीताप्रेस्, गोरखपुरम्, 2009
2. साहित्यदर्पणः – भारतीयबुककर्पोरेसन, दिल्ली, चतुर्थसंस्करणम् ।
3. रसगङ्गाधरः – कृष्णदास अकादेमी, वारणासी, प्रथमसंस्करणम् ।
4. वक्रोक्तिजीवितम् – चौखम्बासुरभारतीप्रकाशनम्, वारणासी ।
5. नाट्यशास्त्रम् – भारतीयविद्याप्रकाशनम्, दिल्ली –2003
6. मेघदूतम् – चौखम्बासंस्कृत संस्थान, वारणासी, द्वादशसंस्करणम्
7. प्रज्ञादूतम् – प. प्रबोधचन्द्रमिश्रः, कोणार्कपब्लिशर्स, तुलसीपुर, कटक –8
8. शालिनीदूतम् – प. प्रबोधचन्द्रमिश्रः, कोणार्कपब्लिशर्स, तुलसीपुर, कटक –8